0209

A

Total No. of Questions—16

Total No. of Printed Pages—4

Regd. No. 1960234127

Part II

# SANSKRIT, Paper - II

(Second Language)

*Time : 3 Hours]* *[Max. Marks : 100*

**Note :—**(1) *ALL* questions should be attempted.

(2) Question Nos. **1, 2** and **3** should be answered in the medium of instruction of the candidate.

(3) The remaining questions should be answered in Sanskrit (Devanagari Script) only.

(4) The bits of a question should be attempted together.

**सूचना :—** (1) **सर्वे** प्रश्नाः समाधेयाः।

(2-3) प्रथम, द्वितीय, तृतीय प्रश्नान् विहाय अन्ये प्रश्नाः संस्कृतभाषायामेव (देवनागरी लिप्या) समाधेयाः।

(4) अंशयुक्तस्य प्रश्नस्य अन्तर्गताः अंशाः एकत्रैव समाधेयाः।

1. एकस्य श्लोकस्य प्रतिपदार्थं, भावं च लिखत — 1×8=8

(अ) अत्युन्नतपदारूढः पूज्यान्नैवावमानयेत्।
नहुषः शक्रतामेत्यच्युतोऽगस्त्यावमाननात्॥

(आ) प्राणायामेन युक्तेन सर्वरोगक्षयो भवेत्।
अयुक्ताभ्यासयोगेन सर्वरोगस्य सम्भवः॥

2. एकं निबन्धप्रश्नं समाधत्त — 1×6=6

(अ) गङ्गावतरणे रतस्य भगीरथस्य प्रयत्नं संग्रहेण लिखत।

(आ) 'काव्यं पुष्पविलापनाम हृदिमे स्फूर्तम्' विवृणुत।

3. एकं निबन्धप्रश्नं समाधत्त — 1×6=6

(अ) गोपालः कृष्णः कथं गोविन्दः अजायत ?

(आ) चूडाला शिखिध्वजस्य मनः कथं परिवर्तितवती ?

4. **त्रयाणां** प्रश्नानां समाधानानि लिखत – 3×2=6

(अ) ऐरावताधिरूढः देवेन्द्रः किमर्थं प्रतीक्षते ?

(आ) राज्यं नाम कीदृशम् ?

(इ) गरुडेन कः त्वमिति पृष्टः जीमूतवाहनः किमवदत् ?

(ई) पितृसद्मगोचरः अपि शिवः कीदृशः ?

(उ) वासुकिना गरुत्मान् किमिति अभिहितः ?

(ऊ) भरतः कीदृशं रामं द्रष्टुमैच्छत् ?

5. **द्वयोः** ससन्दर्भं भावं लिखत – 2×3=6

(अ) मनोरथो महानेषः भगीरथ! महारथ!।

(आ) अवदत्, माङ्गलिकं गलेऽस्ति ते।

(इ) भविता ते न कदापि सत्त्वसादः।

(ई) जातस्त्वं भुवि गौतमस्य।

6. **द्वयोः** ससन्दर्भं भावं लिखत – 2×3=6

(अ) कमपि प्रतिकारं कुरुष्व।

(आ) भवन्तमभिषेक्तुम् आगतं मया।

(इ) ईदृशस्य नृपस्य राज्ये जलपानमपि अधर्मः।

(ई) यदि कौतूहलम् आकर्ण्यताम्।

7. **त्रयाणां** प्रश्नानां समाधानानि लिखत – 3×2=6

(अ) कस्मात् युधिष्ठिरः नरकक्लेशं ददर्श ?

(आ) किं त्यागेनैव उपलभ्यते ?

(इ) अगस्त्यः कम्परायाय किमर्थं खड्गं प्रेषयति ?

(ई) कस्याः पतनं पृथिवी न सहिष्यति ?

(उ) भक्तः किमर्थं पुष्पवनम् अगच्छत् ?

(ऊ) विश्वामित्रः हरिश्चन्द्राय किं ददे इति अवदत् ?

8. **त्रयाणां** प्रश्नानां समाधानानि लिखत – 3×2=6

(अ) एकस्मिन् दिने कृष्णः कान् ददर्श ?

(आ) शूद्रकस्य राजधानी का ?

(इ) अन्ते वीरः राजानं किमवोचत् ?

(ई) चूडाला स्वपतिदेवं किमिति अवदत् ?

(उ) कदा नरेन्द्रस्य विस्मयः द्विगुणः अजायत ?

(ऊ) त्रिशिराः त्रिभिः शिरोभिः किं किं अकरोत् ?

9. एकेन वाक्येन समाधानं दत्त – 5×1=5

(अ) का जह्नुसुता इति प्रोच्यते ?

(आ) मधुराविजयस्य कर्त्री का ?

(इ) कतिभिः दिनैः चाणक्यः नन्दान् अपातयत् ?

(ई) हरिश्चन्द्रस्य केन विस्मृतिः आगता ?

(उ) शूरं केन भेदयेत् ?

10. एकेन वाक्येन समाधानं दत्त – 5×1=5

(अ) शुकः केन रक्षितः ?

(आ) गोविन्दपट्टाभिषेकः कस्मात् ग्रन्थात् स्वीकृतः ?

(इ) केन करः प्रेषितः ?

(ई) नरेन्द्रः केन नाम्ना लोकविख्यातः अभवत् ?

(उ) उज्जयिन्याः राजा कः ?

11. अधोनिर्दिष्टां कथां पठित्वा, प्रश्नानां समाधानं दत्त – 5×1=5

अस्ति कस्मिंश्चित् वने चतुरको नाम जम्बुकः। तेन कदाचिदरण्ये स्वयं मृतः गजः समासादितः। अथ तुष्टः सः तस्य समन्तात् भ्रमतिस्म। परं कठिनां तस्य त्वचं दन्तैः भेत्तुं न शशाक। अत्रान्तरे कोऽपि सिंहः तत्र आजगाम। तं दृष्ट्वा वञ्चकः चतुरकः साष्टाङ्गपातं प्रणिपत्य प्रोवाच।

'स्वामिन्! भवत्पादसेवकोऽहं भवदर्थं गजम् इमं रक्षामि। तदयं भक्ष्यतां स्वामिना' इति। सिंहः प्राह :

'जम्बुक! नाहमन्यहतं सत्वं भक्षयामि। तदेव ते मया प्रसादीकृतम्। अतः त्वमेव भक्षय' इति।

तत् श्रुत्वा जम्बुकः सानन्दमाह 'युक्तमेवं स्वामिनो मृगेन्द्रस्य' इति। अथ सिंहः गतः।

**प्रश्नाः—**

(अ) जम्बुकस्य नाम किम् ?

(आ) जम्बुकेन अरण्ये कः समासादितः ?

(इ) तस्य त्वक् कथमस्ति ?

(ई) तत्र कः आजगाम ?

(उ) सिंहः जम्बुकं प्रति किमाह ?

12. नामनिर्देशपूर्वकं **त्रीणि** सन्धत्त — 3×2=6

(अ) मनस् + चलति

(आ) गुरुः + जयति

(इ) षट् + वारम्

(ई) रामस् + षष्ठः

(उ) तत् + नाम

(ऊ) वृक्षः + फलति।

13. नामनिर्देशपूर्वकं **त्रीणि** विघटयत — 3×2=6

(अ) रामश्शेते

(आ) नमस्ते

(इ) हरिष्टीकते

(ई) जगन्नाथः

(उ) तपोवनम्

(ऊ) वाग्वादः।

14. **द्वौ** शब्दौ अन्त, लिङ्ग, विभक्ति, वचन निर्देशपूर्वकं सम्पूर्णतया लिखत — 2×6=12

(अ) भिषक्

(आ) सम्पद्

(इ) मनस्

(ई) यद् (स्त्रीलिङ्गे)।

15. समासनामनिर्देशपूर्वकं **त्रयाणाम्** विग्रहवाक्यानि लिखत — 3×2=6

(अ) अधर्मः

(आ) यथाशक्ति

(इ) नीलघटः

(ई) सप्तरात्रम्

(उ) महाबलः

(ऊ) पितरौ।

16. अधोरेखाङ्कितपदं शुद्धीकृत्य शुद्धं वाक्यं लिखत— 5×1=5

(अ) छात्रः गुरुं नमस्कुर्वन्ति।

(आ) वृक्षात् फलम् अपतन्।

(इ) अहं पाठान् पठावः।

(ई) सः विद्यालये अपठताम्।

(उ) एते भयेन धावति।